M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 1188

Title: Tripindi Shraddha Prayoga

1188

Complete

	Tripindi Shraddha Prayoga	Title
	Tristhali Setu	~~Author~~
		Editor
8th		Year, Vols.
		Publisher
1188		Remarks

श्रीगणेशायनमः अथत्रिपिंडीश्राद्धप्रयोगः तदुक्तं गारुडे आद्यो यवमयः पिंडो द्वितीयो व्रीहिसंभ
त्रि.श्रा. वः तृतीयश्चतिलैः कार्यं एवंपिंडत्रयंस्मृतं पिशाचमोचनतीर्थे स्नात्वा तत्रनित्यक्रियां विधाय स्वकुलंज
१ सान्ब्राह्मणत्रयंनिमंत्र्य देशकालौसंकीर्त्य अपसव्यं त्रिविधानां दिविस्थानां अंतरिक्षस्थानां भू
मिस्थानां अज्ञातनामगोत्राणां सात्विक राजसतामसानां प्रेतानां मोक्षार्थं अमुकस्यशरीरपीडापरिहारा
र्थं आरोग्यार्थं अमुकस्य संतानप्रतिबंधनिवृत्यर्थं त्रिपिंडीश्राद्धं कुर्वे तदंगत्वेन संकल्प ब्राह्मणप्रदक्षिणात्र
यंकृत्वा अपसव्यं विप्रान्निमंत्रयेत् दिविस्थानां सात्विकानां अज्ञातनामगोत्राणां त्रिपिंडीश्राद्धे भोजनार्थे
निमंत्रिता भवंतः अंतरिक्षस्थानां राजसानां अज्ञातनामगोत्राणां त्रिपिंडीश्राद्धे भोजनार्थे० भूमिस्था
नां तामसानां त्रिपिंडीश्रा० सर्वं अग्रपूर्वं कृत्वा० पुण्यतिथौ त्रिपिंडीश्राद्धाधिकारसिद्ध्यर्थं श्रीविष्णुपू
जनपूर्वकं विष्णुतर्पणं करिष्ये सहस्रशीर्षेतिषोडशर्चस्य सूक्तस्य नारायण ऋषिः आद्यानां पंचद
शर्चानां अनुष्टुप्छंदः अंत्यायास्त्रिष्टुप् सर्वासां पुरुषोदेवता न्यासपूजनाभिषेकतर्पणे विनियोगः
आवाहनादिविष्णुपूजां नमस्कारांतां कृत्वा विष्णुतर्पणं कुर्यात् यथा अनादिनिधनो देवः शंखचक्रगदाधरः
अक्षय्यः पुंडरीकाक्षः प्रेतमुक्तिप्रदो भव १ अतसीपुष्पसंकाशं पीतवाससमच्युतं येनमस्यंति गोविंदं न
तेषां विद्यते भयं २ कृष्णकृष्ण कृपालो त्वं अगतीनां गतिर्भव संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ३
नारायण सुरश्रेष्ठ लक्ष्मीकांत वरप्रद अनेन तर्पणेन त्वं प्रेतमोक्षप्रदो भव ४ पुनः कुशतिलमिश्रजलं
गृहीत्वा यः कश्चिदत्रलोके प्रेतत्वंसंप्राप्तो नराधमः समेप्रीतः सुखंददात्वस्मैदत्तंतिलोदकं ५ पक्कोभ १
गतायेच सर्वयोनिष्ववस्थितः समेप्रीतः सुखंददात्वस्मैदत्तंतिलोदकं ६ यः कश्चित्कुलेभग्न मृत्युकाले
कृतेनच समेप्रीतः ७ इतिविष्णुतर्पणं मधुवाता इतिचंत्वा पूजोपचारान् प्रोक्षेत् अपसव्यं पिशाचमोच
नतीर्थे त्रिपिंडीश्राद्धं कुर्वे ममाधिकारसंपदस्त्विति भवंतो ब्रुवंतु त्रिपिंडीश्राद्धाधिकारसंपद
संपद

कालस्य मुख्यः कालो भवति भवतो ब्रुवंतु मुख्यः कालोऽस्तु हविर्योग्यतास्त्विति भवंतो ब्रुवंतु हविर्योग्यतास्तु
पुनः संकल्पः दिव्यंतरिक्षभूमिस्थानां अज्ञातनामगोत्राणां सात्विकराजसतामसानां प्रेतानां एकोद्दिष्ट
विधानात्रिपिंडीश्राद्धसंबंधः क्षणः क्रियतां कुरुष्वेत्यनुज्ञातः दिविस्थानां सात्विकानां अज्ञातनामगोत्राणां प्रेतानां आहु
वनीयार्थे क्षणः दत्ता भवद्भिः प्रसादः कर्तव्यः ॐ कर्तव्यः अंतरिक्षस्थानां राजसानां अज्ञातनामगोत्राणां
प्रेतानां आहवनीयार्थे० भूमिस्थानां तामसानां अज्ञातनामगोत्राणां प्रेतानां आहवनीयार्थे० अक्रोध
नैः शौचपरैः० बहिर्वर्तुलमंडलत्रयं कृत्वा तत्र गंधादि निक्षिप्य सव्यं अपउपस्पृश्य अपसव्यं दिव्यं
तरिक्षभूमिस्थाः अज्ञातनामगोत्राः सात्विकराजसतामसप्रेताः आगतं स्वागतं दिव्यंतरिक्षभू
मिस्था अज्ञात० प्रेताः इदं वः पाद्यं सुपाद्यं शंनोदेवी० दिव्यंतरिक्ष० प्रेताः अत्र अभोवो गंधाः सुगंधाः
अक्षतपुष्पस्वक्षतमुख्य अर्चनविधेः पर्यर्चितमस्तु दिव्यंतरिक्ष० प्रेताः सम्याध्वं समाप्तसहे अत्र तृप्ति
[illegible] तिलोदकद्वक्करणं गंधपुष्पत्र [illegible]
तं पूर्वत्र० पिशाचमोचनतीर्थे एकोद्दिष्टविधिना त्रिपिंडीश्राद्धं करिष्ये कुरुष्व अग्निष्वात्ताः पितरो
गणाः प्राचीनावीतीति पाकप्रोक्षणविधिवदस्तु अस्तु विधिवदस्तु यद्देवादेवेति पाकप्रोक्षणं दि० स्थानां
सात्विकानां अज्ञातनामगोत्राणां प्रेतानां भूर्भुवः स्वः इदमासनं० अंतरिक्षस्थानां राजसानां अज्ञातनामगोत्रा
णां प्रेतानां भू० इदमासनं० भूमिस्थानां तामसानां अज्ञातनामगो० इदमा० नावाहनं अर्घ्यपात्रमासाद्य
एकोऽर्घ्यः एकपवित्रं एवं पात्रत्रयं निधाय शंनोदेवीत्यादि पुष्पाण्यसिंचेत् यादिव्या आपः० दिविस्थाः सात्वि
काः अज्ञातनामगोत्राः प्रेताः इदं वोऽर्घ्यं० यादिव्या आ० अंतरिक्षस्था राजसा अज्ञातनाम० प्रे० इदं वोऽर्घ्यं० भूमि
स्थाः तामसा अज्ञात० प्रे० इदं वो० २ यादि० सर्वत्र पात्रन्युब्जीकरणं नास्ति अर्घ्यदानवत् गंधादि आच्छादनां
तं विभक्तयोहात्मा उपवीतानि दत्वा सात्विकराजसतामसेभ्यः प्रेतेभ्यः अर्घ्यगंधपुष्प आच्छादनांता उपचाराः०
शर्करामधुसर्पिर्युतपिंडत्रयं कृत्वा पूर्वोत्र० त्रिविधपात्रस्वर्थं पुष्पदस्तुदत्वा पात्रासादनं करिष्ये० अत्र
तैर्गा

कव्यस्यमुखः कालेताक्षितिभवतै ब्रुवंतु मुखः कालोस्तु हविर्योग्यतास्त्विति स्वंतु ब्रुवंतु हविर्योग्यतास्तु
पुनः संकल्प्य दिव्यंतरिक्षभूमिस्थानां अज्ञातनामगोत्राणां सात्विकराजसतामसानां प्रेतानां एकोद्दिष्टवि
धिना त्रिपिंडीश्राद्धं सद्यः करिष्ये कुरुष्वेत्यनुज्ञातः दिविस्थानां सात्विकानां अज्ञातनामगोत्राणां प्रेतानां आह
वनीयार्थे क्षणंदत्ता भवद्भिः प्रसादः कर्तव्यः स्व कर्तव्यः अंतरिक्षस्थानां राजसानां अज्ञातनामगोत्राणां
प्रेतानां आहवनीयार्थे० भूमिस्थानां तामसानां अज्ञातनामगोत्राणां प्रेतानां आहवनीयार्थे० अक्रोध
नैः शौचपरैः० बहिर्वर्तुलमंडलत्रयं कृत्वा तत्र गंधादि निक्षिप्य सव्यं अपउपस्पृश्य अपसव्यं दिव्यं
तरिक्षभूमिस्थाः अज्ञातनामगोत्राः सात्विकराजसतामसप्रेताः आगतं स्वागतं दिव्यंतरिक्षभू
मिस्था अज्ञात० प्रेताः इदं वः पाद्यं सुपाद्यं शंनोदेवी० दिव्यंतरिक्ष० प्रेताः अत्र अभीवो गंधाः सुगंधाः
अक्षतपुष्पस्वच्छतमुत्वं अर्चनविधेरर्चितमस्तु दिव्यंतरिक्ष० प्रेताः समाध्वं समास्महे अत्रउपवि
[illegible] गंधपुष्प[illegible]
तं पूर्ववत् पिशाचमोचनतीर्थे एकोद्दिष्टविधिना त्रिपिंडीश्राद्धं करिष्ये कुरुष्व अग्निष्वात्ताः पितरग
णाः प्राचीनावीतिनः पाकप्रोक्षणविधिवदस्तु अस्तु विधिवदस्तु यद्देवादेवेति पाकप्रोक्षणं दिविस्थानां
सात्विकानां अज्ञातनामगोत्राणां प्रेतानां भूर्भुवः स्वः इदमासनं अंतरिक्षस्थानां राजसानां अज्ञातनामगोत्रा
णां प्रेतानां भू० इदमासनं भूमिस्थानां तामसानां अज्ञातनामगो० इदमा० नात्रावाहनं अर्घ्यपात्रमासाद्य
एकोर्घ्यः एकपवित्रः एवं पात्रत्रयं निधाय शन्नोदेवीरित्यादि पुष्पाणि सिंचेत् यादिव्याआपः० दिविस्थाः साति
काः अज्ञातनामगोत्राः प्रेताः इदं वोर्घ्यं० यादिव्याआ० अंतरिक्षस्था राजसा अज्ञातना० प्रे० इदं वोर्घ्यं० भूमि
स्थाः तामसा अज्ञात० प्रे० इदं वो० यादि० सर्वत्र पात्रन्युब्जीकरणं नास्ति अर्घदानवत् गंधादि आच्छादनां
तं विभक्तयो ज्ञातव्याः उपवीतानि दत्वा सात्विकराजसतामसेभ्यः प्रेतेभ्यः अत्र गंधपुष्प आच्छादनांता उपचाराः०
शर्करा मधु सर्पिर्युत पिंडत्रयं कृत्वा पूर्वोक्त० त्रिविधपात्रं स्वार्थं पुष्पदत्वा [illegible] यापात्रासादनं करिष्ये० भस्म
तेषां

त्रि·श्री· नामंडलंकृत्वा· तूष्णींकरशुद्धिः अग्नौकरणाभावः मूर्धानंदिवइत्साज्यंमधुपायसंमा पात्रंकृसरान्नानिवपरिविष्य· मध्वादि
२ युक्तं यवपिष्टं प्रथमपात्रे· मध्वादियुक्तंतंडुलपिष्टंद्वितीयपात्रे· मध्वादियुक्तंतिलपिष्टंतृतीयपात्रेदत्वा· गायत्र्याभ्युक्षण·
पृथ्वीतेपात्रं· स्वधा·इदंविष्णु· एवंप्रतिपात्रंत्रिभिः· दिविष्ठेभ्यः सात्विकेभ्यः अज्ञातनामगोत्रेभ्यः प्रेतेभ्यः इदंमधुपायसादि
अन्नंसोपस्करंतत्तत्पिशाचमोचनतीर्थेदत्तमक्षय्यमस्तु· अंतरिक्षस्थेभ्यः अज्ञातनामगोत्रेभ्यः प्रेतेभ्यः इदंमधुपाय
सादिअन्नं सोपस्करादिसहितंतत्तत्पिशाचमोचनतीर्थे दत्तमक्षय्यमस्तु· भूमिस्थेभ्यः तामसेभ्यः अज्ञातनामगोत्र
प्रेतेभ्यः इदंमधुपायसादिअन्नंसोपस्करादिसहितंतत्तत् पिशाचमोचनतीर्थेदत्तमक्षय्यमस्तु येचेह पितरो· स्वधा· नुप
स्व· सव्यं· अन्नार्पणं अपसव्यं आपोशानंदत्वा· एकोविष्णु· अनेनब्राह्मणभोजनेनदिव्यांतरिक्षभूमिस्थेभ्यः सात्विकरा
जसतामसेभ्यः अज्ञातनामगोत्रप्रेतेभ्यः प्रीयतांनममेतिभूमौसकुशांतिलंजलंभूमौप्रक्षिपेत्· ईशानविष्णुकमला·
दिव्यांतरिक्षभूमिस्थाः सात्विकराजसतामसाः अज्ञातनामगोत्रप्रेताः तत्तत् पिशाचमोचनतीर्थेअनृतंजुषध्वं· सव्यं स
कृद्विर्गायत्रीजपः अपसव्यं तृप्तान्ज्ञात्वा अन्नंप्रकीर्य विकिराभाव· उत्तरापोशानंदत्वा· मधुवाताइतितृचं स्वादिव्यांत
रिक्षभूमिस्थाः सात्विकराजसतामसाः अज्ञातनामगोत्रप्रेताः तृप्ताःस्थ इतियजमानोब्रूयात् तृप्ताःस्म इतिब्राह्मणाः·
पिंडदानंकरिष्ये· दक्षिणाभिमुखः सव्यंजान्वाच्यअपहतातरस्वामुष्टिरव्यकुशानास्तीर्य· तिलोदकमादाय· अस्मत्कुलेमृतायेच्च
गतिर्येषांनविद्यते· आवाहयिष्येतान्सर्वान्दर्भपृष्ठेतिलोदकैः· मातृवं[illegible]मृतायेच्चगतिर्येषांनविद्यते· आवाहयिष्ये
तान्सर्वान्दर्भपृष्ठेतिलोदकैः· बंधुवर्गेमृतायेच्चगतिर्येषांनविद्यते· तिलोदकंमयादत्तंअक्षय्यमुपतिष्ठतां इतिश्लोकत्र
येणदत्त्वापरि तिलोदकंदत्वा ततः यवपिंडंस्पृष्ट्वा मधुवाताइतितृचंजप्त्वा पिंडमादाय पितृवंशेमृतायेच्चमातृवंशेतथ
व· गुरुश्वशुरबंधूनांयेचान्येबांधवास्तथा १ येमेकुलेलुप्तपिंडाः पुत्रदारविवर्जिताः· क्रियालोपगताश्चैवजात्यंधाः
पंगवस्तथा २ विरूपाआमगर्भाश्चज्ञाताज्ञाताः कुलेमम· धर्मपिंडोमयादत्तोह्यक्षय्यमुपतिष्ठतु ३ असिपत्रवनेघोरेकुंभी
पाकेचयेगताः तेषामुद्धरणार्थाय इमंपिंडंददाम्यहं ४ उत्पन्नकुलवंश्यानांयेषांदाताकुलेनहि धर्मपिंडोमयादत्तोह्य
क्षय्यमुपतिष्ठतु ५ इतिश्लोकान्पठित्वा इमंयवमयंपिंडंमधुरत्रयसंयुतं· ददामितस्मैप्रेताय यःपीडांकुरुतेमम १ येके २
चित्प्रेतरूपेणवर्तंते पितरोमम· यवपिंडप्रदानेन तृप्तिंगच्छंतुशाश्वतीं २ येकेचिद्दिवितिष्ठंति प्रेताः सात्विकरूपिणः·
सात्विकाः पिंडदानेन तृप्तिंगच्छंतुतेक्षयां ३ दिविष्ठाः सात्विकाः अज्ञातनामगोत्राः प्रेताः एषयवपिंडोक्षय्यमुपतिष्ठ
तु ४ इतियवमयंपिंडंदद्यात्· ततः श्रीहिमयंपिंडंस्पृष्ट्वा मधुवाताइतितृचंजपेत्· पिंडमादायपितृवंशइतिश्लोकत्रयंपठि

त्वाइमंश्रीहिमयंपिंडंमधुरत्रयसंयुतं। तनुकूलमेप्रदास्यामिमःपीडांकुरुतेमम १ येकेचित्प्रेतरूपेणवर्त्तंतेपितरोमम। तेषांसर्वेषांपिंडदा
नेनअक्षय्यगतिमुत्तमां २ अंतरिक्षेचयेकेचित् राजसावायुरूपिणः राजसाः पिंडदानेनतेतृप्यंतुमुदान्विताः ३ अंतरिक्षस्था
राजसाः अज्ञातनामगोत्राःप्रेताः एषश्रीहिमयःपिंडोक्षय्यमुपतिष्ठतु इतिपिंडंदद्यात् तिलपिंडंस्पृष्ट्वामधुवाताइति
तचंजस्वा पिंडमादाय पितृवंशइतिपूर्ववत्श्लोकत्रयंपठित्वा नमः इमंतिलमयंपिंडंसर्पिषामधुनायुतं तेभ्योददामि
येपांतामसकुलेकुर्वतेसदा १ येकेचित्तामसाःप्रेताभूमौतिष्ठंतिसर्वदा। तिलपिंडप्रदानेनगतिंगच्छंतुतेध्रुवं २ तमोरूपाश्च
येकेचिद्वर्त्तंतेपितरोमम। पिण्याकपिंडदानेनतृप्यंतुक्षुधार्दिताः ३ भूमिस्थाःतामसाःअज्ञातनामगोत्राःप्रेताः एषति
लपिंडोक्षय्यमुपतिष्ठतु इतिपिंडंदद्यात्। सव्यं अपउपस्पृश्य। अपसव्यं। अत्रपितरइतिजपः। पितृवंशइतिश्लोक
त्रयेणत्रिषुपिंडेषुप्रत्येकंतिलोदकंदत्वा नीवीविस्रंसनं। नमोवःपितरइति। इतिपिंडांजलिकरणं। ततःत्रिषुपिंडेषुएतद्वः
पितरोवासइतिमंत्रावृत्त्यासूत्रंदद्यात् सव्यंकुलाभिवृद्ध्यर्थंपिंडपूजनंकरिष्ये। सात्विकराजसतामसेभ्यः गंधादि
दक्षिणांतैःपचारैःपूजनं। अर्घ्यदानंकुर्यात् ततः अर्घ्यपात्रेगंधोदकंतुलसीपुष्पाणिचप्रक्षिप्यउपवीती अर्घ्यपात्रमादाय
दिविस्थसात्विकाअज्ञातनामगोत्राःप्रेताः इदमर्घ्यंसमर्पयामि इतिप्रथमपिंडोपरिदद्यात् पुनरर्घ्यपात्रमादायजंबीरफलत्रयं अंतरिक्षस्थराजसा
अज्ञातनामगोत्राःप्रेताः इदमर्घ्यं श्रीहिपिंडोपरिदद्यात्। पुनःअर्घ्यपात्रेखर्जूरफलत्रयं भूमिस्थाःतामसाःअज्ञातनामगोत्राःप्रेताः इदमर्घ्यं तिल
पिंडोपरिदद्यात् इतिबहतीति पिंडमूलेउदकनिषेकः विश्वहत्तीविबाआपःशांतिरस्तु सात्विकराजसतामसप्रेतेभ्यः दिव्यंतरिक्षभूमिस्थे
भ्यः यद्दत्तंत्रिपिंडश्राद्धेअन्नमुदकंदक्षय्यमस्तु सव्यं अस्मत्कुलेवर्द्धतामितियजमानः स्वस्तिवर्द्धतामितिब्राह्मणाः अपस
व्यं इतिवहतीतित्रिपिंडमूलेउदकनिषेकः उपविष्टेभ्योब्राह्मणेभ्यः दिविस्थेभ्यः सात्विकेभ्यः अज्ञातनामगोत्रेभ्यः प्रेतेभ्यः इ
दंवस्त्रंदक्षिणांपातु अंतरिक्षस्थेभ्यःराजसेभ्यःअज्ञातनामगोत्रेभ्यःप्रेतेभ्यः अयंकमंडलुर्दक्षिणांपातु भूमिस्थेभ्यःतामसेभ्यः
अज्ञातनामगोत्रेभ्यःप्रेतेभ्यः इमाउपानहौदक्षिणांपातु सव्यं पिंडेषुनमस्कारः अथयद्देवअज्ञानेनैतत् गोत्रस्याभिवृद्धि
रस्तिति ब्राह्मणाब्रयुः अपसव्यं पुष्पदंतुइत्यपिंडानुद्वासयेत् उद्वास ये तिब्राह्मणाः तद्विष्णोः मंत्रेणपात्रा
ण्यामवधाय अदक्षिणंनभवति सव्यं पात्रप्रक्षाल्याचम्य ततोविप्रप्रार्थना दिव्यंतरिक्षभूमिस्थाः सात्वि
कराजसास्तथा प्रेतानामसायेवशांतिंयांतुतचिता इतिप्रार्थना यजमानस्याशीर्वादोदेय स्वाद्यमस्तु मया
यत्कृतंसात्विकराजसतामसप्रेतानुद्दिश्यपित्रामोचनतीर्थेत्रिपिंडीश्राद्धंतत्कालहीनं मंत्रहीनंदक्षिणाहीनंतत्ब्रा
ह्मणवचनात्सर्वंश्रीविष्णोःप्रसादात्संपूर्णमस्तु। अस्तु। इतित्रिपिंडीश्राद्धप्रयोगः सांगतार्थं गोदानं तिल
पात्रंघृतपात्रंच गोदानप्रयोगोन्यतोवगंतव्यः इतित्रिस्थलीसेतौ त्रिपिंडीश्राद्धप्रयोगः समाप्तः